दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-237 | 1 | जून 25 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः आषाढ़कृष्णामावस्या
आषाढ़ 11 प्रविष्ठांशः मङ्गलमयः भवेत्

2 Shimla News: २९ दिवसानन्तरं शिमलायाः पुलिसाधीक्षकः संजीवगांधी कार्यभारं स्वीकृतवान् गौरवसिंहः कार्यमुक्तः

3 'पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च' विषयक- एकविंशतिदिनात्मक- राष्ट्रिय कार्यशालायाः द्वितीयदिवसस्य विधिवत् समापनम्

4 मनोविज्ञाने ध्यानस्वरूपम् अतीव महत्त्वपूर्णः विषयः वर्तते, येन मनसः समस्यानां समाधानं भवितुम् अर्हति।

## आपरेशन् सिन्दूर् इत्यनेन आतङ्कवादस्य विषये भारतस्य शून्य-सहिष्णुता-नीतेः दृढः वैश्विकसन्देशः प्रेषितोऽस्ति - प्रधानमन्त्री नरेन्द्रमोदी

**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्र मोदी अकथयत् यत् आपरेशन् सिन्दूर् इत्यनेन आतङ्कवादेति विषये भारतस्य शून्य-सहिष्णुता-नीतेः प्रबलं वैश्विकं च सन्देशम् प्रेषितमस्ति। सः अवदत् यत् भारतीयनागरिकाणां हानिं जनयितारं कुत्रापि स्थानं सुरक्षितं नास्ति इति भारतं स्पष्टम् अकरोत्। अवधेयं वर्त्तते यत् नवदेहल्यां भारतस्य महान् आध्यात्मिक-नैतिकनेतृभ्यां श्रीनारायणगुरु-महात्मागान्धी-इत्येतयोः मध्ये आयोजितस्य ऐतिहासिक-संवादस्य शतवार्षिक-उत्सवे प्रधानमन्त्री भाषणं कुर्वन् आसीत्। श्रीनारायणगुरुवर्यस्य महात्मागान्धीवर्यस्य च ऐतिहासिकं वार्तालापं भारतस्य स्वातन्त्र्य-आन्दोलनाय नूतनां दिशां अयच्छदिति प्रधानमन्त्री उक्तवान्।




प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् केरलस्य शिवगिरि-मठे एकशताब्देः पूर्वं श्रीनारायण-गुरु-महात्मा-गान्धी-इत्येतयोः मध्ये जातेन ऐतिहासिकसंवादेन स्वातन्त्र्य-आन्दोलनाय नूतना दिशा दत्ता। सः इत्यपि अवदत् यत् शतवर्षपूर्वं, यदा जनाः सामाजिक-दुराचारान् विरुध्य वक्तुं भीतिमनुभवन्ति स्म, तदा श्रीनारायणगुरुः सत्येन, सेवया, सौहार्देन समानतया प्रगाढविश्वासेन च जनानां मार्गदर्शनमकरोत्। श्रीमोदी अवदत् यत् प्रेरणेषा राष्ट्रम् 'सबका साथ, सबका विकास' इत्यस्य मार्गे निरन्तरतया प्रेषयन्त्यस्ति।

**सुभाषितम्**

न कुलं वृत्तहीनस्य,
प्रमाणमिति में मतिः।
अन्तेष्वपि हि जातानां,
वृत्तमेव विशिष्यते॥

अर्थात्- कुल से मनुष्य की पहचान नहीं हो सकती। मनुष्य की पहचान उसके सदाचार से होती है, भले ही वह किसी भी कुल में क्यों न पैदा हुआ हो।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

## अमरीकादेशस्य राष्ट्रपतिनः युद्धविरामस्य घोषणायाः अनन्तरम् अपि इरान-देशः क्षिपणि-प्रहारं कृतवान् - इजराइल-देशः



हिमसंस्कृतवार्ताः - अमरीकादेशस्य राष्ट्रपतिना डॉनल्ड् ट्रम्प् इत्यनेन युद्धविरामस्य घोषणायाः अनन्तरम् अपि इरान-देशः क्षेपास्त्राणां प्रक्षेपणं कृतवान् इति इजराइल-रक्षा-बलम् उदघोषयत्। आई. डी. एफ़. इत्यनेन ईरान-देशात् नूतनं वैलेस्टिक्-क्षिपणि-प्रक्षेपणं प्रक्षिप्तमिति ज्ञातम्, उत्तर-इजराइल-प्रदेशे सैरन् इत्यस्य नादश्चाभवत् इत्यपि तेनोक्तम्। इरानदेशेन सह द्वैपाक्षिक-युद्धविरामाय इजराइलदेशः सहमतः इत्युक्तेः कश्चित्कालानन्तरमेव एतत् जातम्। इजराइल-देशस्य प्रसारमाध्यमाः अवदन् यत् रक्षामन्त्री इजराइल काट्ज़ इत्येषः इरान-देशस्य राजधान्यां तेहरान्-नगरे तीव्र-आक्रमणाय आदेशं दत्तवान्। इरान-देशः अमरीका-कतर-देशयोः मध्यस्थतया कृतस्य युद्धविरामस्य उल्लङ्घनम् अकरोत् इति आरोपं आरोपितवान्। तत्सम्बद्धे विकासे इरानस्य उपविदेशमन्त्री कतार-देशं प्रति कार्तज्ञभावान् प्रकटितवान् यत् सः अस्मिन् क्षेत्रे युद्धं निवारयितुं साहाय्यं कृतवान् । इतः पूर्वं इजराइलदेशः अमरीकायाः राष्ट्रपतिनः डॉनाल्ड ट्रम्प् इत्यस्य ईरानदेशेन सह युद्धविरामस्य प्रस्तावं स्वीकृतवान् आसीत्। प्रधानमन्त्री बेञ्जामिन् नेतन्याहु इत्यस्य कार्यालयात् प्राप्ते वक्तव्ये तेहरान्-क्षेत्रस्य परमाणु-बैलेस्टिक्-क्षिपणि-आपदायाः निवारणस्य लक्ष्यं प्राप्य सः युद्धविरामाय सहमतः अभवत् । वक्तव्ये इरानस्य परमाणु-विभीषिकायाः निर्मूलनार्थं संयुक्तराज्यामरीका-देशस्य समर्थनाय सहभागितायै च अपि आभारभावाः प्रकटिताः। नेतन्याहु-वर्यः अपि अवदत् यत् इजरायलदेशः युद्धविरामस्य कस्यापि उल्लङ्घनस्य प्रबलतया प्रतिकारं करिष्यति। इदानीं इजराइल-इरान-देशयोः मध्ये युद्धविरामः प्रचलन्नस्ति उभावपि देशौ युद्धविरामस्य उल्लङ्घनं मा कुरुताम् इति श्रीट्रम्पः उक्तवान्।

## ऑपरेशनसिन्धु इत्यस्य अन्तर्गतं ईरानदेशात् पञ्चनवत्यधिक-द्विशतोत्तरद्विसहस्र-भारतीय-नागरिकाः गृहं प्रत्यानीताः

हिमसंस्कृतवार्ताः - ऑपरेशनसिन्धु इत्यस्य अन्तर्गतं ईरानदेशात् पञ्चनवत्यधिकद्विशतोत्तरद्विसहस्र-भारतीय-नागरिकाः गृहं प्रत्यानीताः । विदेशमन्त्रालयस्य प्रवक्ता रणधीरजायसवालः उक्तवान् यत् ईरानदेशस्य मशाद-नगरात् विशेषविमानेन द्विनवत्यधिकद्विशतम् भारतीयनागरिकाः नवदेहली-नगरं प्राप्तवन्तः। भारतीय-वायुसेनायाः सी-17 विमानेन अपि ऑपरेशनसिन्धु इत्यस्य अन्तर्गतं इजराइल देशात् पञ्चषष्ठ्युत्तरैकशतं भारतीयाः जनाः निष्कासिताः। प्रत्यागतानाम् नागरिकाणां स्वागतम् सूचनाप्रसारणसंसदीय-कार्य-राज्यमन्त्री डॉक्टर एल. मुरुगनः अकरोत्। तेनोक्तञ्च यत् यात्रिणः द्वाविंशति-भिन्नराज्येभ्यः सन्ति, ते च सर्वे अतीव प्रसन्नाः सन्ति।

## आर्थिकवृद्धेः दृष्ट्या भारतं शक्तियुत-अर्थव्यवस्थासङ्घस्य एकादशतः चतुर्थस्थानं प्राप्य जगति वृहत्तमां प्रगतिम् अकरोत्- उपराष्ट्रपतिः जगदीप धनखड़ः

हिमसंस्कृतवार्ताः - उपराष्ट्रपतिः जगदीप धनखड़ः अवदत् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदिनः सर्वकारस्य गतानि दशवर्षाणि, आर्थिकवृद्धेः, अभूतपूर्वसंरचनायाः च दृष्ट्या ऐतिहासिकानि आसन्। बिहारस्य मुज़फ़्फ़र्-नगरे एकस्मिन् कार्यक्रमे सम्बोधयन् धनखड़ः अवदत् यत्, आर्थिकवृद्धेः दृष्ट्या भारतं शक्तियुत-अर्थव्यवस्थासङ्घस्य एकादशतः चतुर्थस्थानं प्राप्य जगति वृहत्तमां प्रगतिम् अकरोत्। सः अवदत् यत् अधुना यूनां कृते विकल्पानाम् प्राचुर्यं वर्तते इत्थं इतः पूर्वं कदापि नासीत्। धनखड़ः एन्. डी. ए. सर्वकारेण प्रवर्तितायाः नूतनशिक्षानीतेरपि प्रशंसाम् अकरोत्।

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## विनिर्माणस्य समर्थनाय निर्यातस्य प्रोत्साहनाय च शुल्कं न्यूनीकृत्य व्यापारस्य भारम् न्यूनीकर्तुं सर्वकारः अनेकान् उपायान् अकरोत्- निर्मला-सीतारमणः

हिमसंस्कृतवार्ताः - केन्द्रीय-वित्त-मन्त्री निर्मला-सीतारमणः अवदत् यत्, विनिर्माणस्य समर्थनाय निर्यातस्य प्रोत्साहनाय च शुल्कं न्यूनीकृत्य व्यापारस्य भारम् न्यूनीकर्तुं सर्वकारः अनेकान् उपायान् अकरोत्। नवदेहली-नगरे एक्ज़िम्-ब्याङ्क्-ट्रेड्-कान्क्लेव् इत्येतं सम्बोधयन्ती श्रीमती सीतारमणः अवदत् यत्, देशस्य आहत्य निर्यातराशिः पञ्चविंशत्यधिकाष्टशत-बिलियन् परिमितं यू. एस्. डालर् इति सर्वकालिकं उच्चत्वम् अवाप्नोत्, पूर्ववर्षस्य अपेक्षया षट् प्रतिशतस्य वृद्धिञ्च अवाप्नोत् । मन्त्री अवदत् यत्, वैश्विक-निर्यातस्य वृद्धिः केवलं चतुर्प्रतिशतम् एव अभवत्, परन्तु भारतस्य निर्यातस्य वृद्धिः गत-वित्तीयवर्षे दशमलवत्र्यधिकषट् प्रतिशतम् आसीत् ।

## Shimla News: २९ दिवसानन्तरं शिमलायाः पुलिसाधीक्षकः संजीवगांधी कार्यभारं स्वीकृतवान् गौरवसिंहः कार्यमुक्तः



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलस्य पूर्व डीजीपी डॉ. अतुलवर्मा इत्यस्य विरुद्धं संघर्षं कुर्वन् शिमलामण्डलस्य वरिष्ठपुलिसाधीक्षकः संजीवगान्धी २९ दिवसेभ्यः परं मंगलवासरे कार्यभारं स्वीकृतवान्। उच्चन्यायालयेन विमलप्रकरणं सीबीआई- समित्याः समक्षं समर्पयितुं निर्देशानाम् अनन्तरं एसपी शिमला इत्यनेन पत्रकारसम्मेलने तत्कालीनपुलिसमहानिदेशकः अतुलवर्मासहितानाम् अनेकानाम् अधिकारिणां कार्यशैल्याः विषये प्रश्नाः उत्थापिताः आसन्। तदनन्तरं सः दीर्घावकाशं प्रेषितः। संजीवगान्धी मंगलवासरे कार्यभारं स्वीकृतवान्। अस्तु, अनुशासनहीनतायाः कारणेन एसपी शिमला संजीवगान्धीं २७ मई दिनाङ्के अवकाशं प्रति सर्वकारेण प्रेषितम् आसीत्। तत्कालीन डीजीपी डॉ. अतुल वर्मा, एसपी शिमला संजीवगान्धी च अनुशासनहीनतायाः परस्परं संघर्षस्य च कारणं दर्शयितुं सूचनापत्रम् अपि निर्गतमासीत्। एसपीशिमलायाः प्रभारः जिलासोलनस्य पुलिसाधीक्षकाय गौरवसिंहाय न्यस्तमासीत् अधुना सः कार्यमुक्तः अस्ति।

## पूर्वमुख्यसचिवः एवं सूचना-आयुक्तः आर. डी. धीमानः रेरा- अध्यक्षः, अमितकश्यपः च सदस्यः नियुक्तः




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य मुख्यसचिवः मुख्यसूचनायुक्तः च सेवानिवृत्तः आईएएस- अधिकारी आर. डी. धीमानः राज्यस्य अचलसम्पत् नियामकप्राधिकरणस्य (रेरा) नूतनः अध्यक्षः भविष्यति। सेवानिवृत्तः आईएएस- अधिकारी अमितकश्यपः च सदस्यत्वेन नियुक्तः। अस्मिन् विषये सर्वकारेण अधिसूचनाकृता अस्ति। विदुरः मेहता सदस्यत्वेन पूर्वमेव कार्यभारं स्वीकृतवान् अस्ति। अधुना बहुकालानन्तरं रेरा-इत्यत्र संख्या सम्पन्ना अस्ति। अस्तु, २० जून दिनाङ्के राज्यस्य उच्चन्यायालयेन रेरा-इत्यस्य अध्यक्षस्य सदस्यस्य च नियुक्तौ विलम्बस्य कारणेन राज्यसर्वकारे ५ लक्षरूप्यकाणां दण्डः कृतः। न्यायालयेन अपि दुर्बलकार्यक्षमतायाः भर्त्सनं कृतम् आसीत्। कार्यालयस्य स्थानान्तरणस्य व्याजेन नियुक्तौ विलम्बः न भवति इति न्यायालयेन उक्तम् आसीत्। विभागपीठिका कठोरनिर्देशान् अददत् यत् यदि अध्यक्षस्य सदस्यस्य च नाम २५ जूनपर्यन्तं न सूचितं भवति तर्हि तस्य विरुद्धं न्यायिकः आदेशः पारितः भविष्यति। न्यायालयस्य भर्त्सनस्य अनन्तरम् अधुना रेरा इत्यत्र सर्वकारेण नियुक्तयः कृताः।

## HPPSC RESULT : लोकसेवा-आयोगेन एलाइडसेवा-परीक्षायाः परिणामः प्रकाशितः, ५६ अभ्यर्थिनः चयनिताः



**हिमसंस्कृतवार्ताः - शिमला।** राज्यलोकसेवा-आयोगेन एलाइडसेवापरीक्षायाः परिणामः घोषितः। प्रारम्भिकलिखितपरीक्षा ८ सितम्बर २०२४ दिनाङ्के अभवत् । मुख्यपरीक्षा ७ तः ९ मार्च २०२५ पर्यन्तं अभवत् । १७ तः १९ जूनपर्यन्तं प्रमाणपत्राणां मूल्याङ्कनं कृत्वा आयोगेन मंगलवासरे ५६ अभ्यर्थिनः चयनिताः इति घोषिताः। सहायकराज्यकर-आबकारी-अधिकारीरूपेण ३३ अभ्यर्थीनां चयनं कृतम् अस्ति । तेषां सर्वेषां नियमितरूपेण नियुक्तिः भविष्यति। एतेषां अतिरिक्तं सहकारीविभागे उद्योगविभागे नव विस्ताराधिकारिणः, दश निर्वाचनकानुनगो, चत्वारः निरीक्षकलेखापरीक्षाप्रशिक्षु आधारेण च सहकारीविभागे नियुक्ताः भविष्यन्ति।

## मुख्यमन्त्री सुखविन्दरसिंहसुखुः ओक ओवर शिमलातः १२ ई-स्कूटरवाहनान् ध्वजं प्रदर्शितवान्

शिमला । मुख्यमन्त्री सुखविन्दरसिंहसुखुः ओक ओवर शिमलातः १२ ई-स्कूटरवाहनान् ध्वजं प्रदर्शितवान्। हिमाचलप्रदेशराज्यस्य एड्सनियन्त्रणसमित्या स्वास्थ्यविभागाय प्रदत्तानि एतानि ई-स्कूटरयानानि राज्यस्य अष्टसु जनपदेषु नियोजितानि भविष्यन्ति। एच.आई.वी., एस.टी.आई., टी.बी., हेपेटाइटिस-रोगेण पीडितानां रोगिणां गृहसमीपे औषधानां, परीक्षणस्य, परामर्शस्य च उत्तमसुविधाः प्रदातुं सर्वकारस्य अस्य उपक्रमस्य उद्देश्यम् अस्ति राज्ये कोऽपि व्यक्तिः उत्तमचिकित्सासौविध्यैः वंचितः न भवेत् इति दृष्ट्या हिमाचले प्रथमवारं एतादृशः समर्पितः प्रयासः कृतः। सर्वकारस्य एतेन संवेदनशीलनिर्णयेन एतैः रोगैः पीडितानां रोगिणां कृते उत्तमाः स्वास्थ्यसेवाः उपलभ्यन्ते, तेषां कृते औषधानां उपलब्धता सुनिश्चिता भविष्यति येन ते स्वस्थजीवनं जीवितुं शक्नुवन्ति। स्वास्थ्यविभागस्य राज्यस्य एड्सनियन्त्रणसमित्याः च एतस्याः उपक्रमस्य प्रशंसाम् कुर्वन् मुख्यमन्त्री उक्तवान् यत् एच.आइ.वी.विषये जनान् जागरूकान् कर्तुं रेड रिबन् क्लबः, युवानः, शैक्षणिकसंस्थाः, गैरसरकारीसंस्थाः च महत्त्वपूर्णां भूमिकां निर्वहन्ति। राज्यं एच.आइ.वी.-मुक्तं कर्तुं सर्वकारस्य जनानां च सामूहिकं दायित्वम् अस्ति ।

## धर्मशालायां केन्द्रीयराज्यमंत्रिणः प्रवासाय भाजपा सज्जा



हिमसंस्कृतवार्ताः - धर्मशाला।केन्द्रीयराज्यमन्त्री हर्षमल्होत्रायाः प्रस्तावितधर्मशालायात्रायाः सज्जतायां हिमाचलप्रदेश-भाजपाप्रदेशमहासचिवः त्रिलोककपूरः धर्मशालायां लायंसक्लबप्रयासभवने आयोजितानां कार्यक्रमानां समीक्षां कृतवान्। तदनन्तरं सः जिलाकाङ्गड़ा भाजपा-अधिकारिभिः सह अपि गोष्ठीं कृतवान्। जिलाकांगड़ायाः भाजपाध्यक्षः सचिन शर्मा, हिमाचलप्रदेशस्य भाजपायाः प्रदेशप्रवक्ता राकेश शर्मा, भाजपायाः प्रदेशमीडियासह प्रभारी अधिवक्ता विश्वचक्षु, युवामोर्चा प्रदेश-उपाध्यक्षः शाश्वतकपूरः, अन्ये च नेतारः कार्यकर्तारः चापि उपस्थिता अभवन्। अस्मिन् सत्रे केन्द्रीयराज्यमन्त्री हर्षमल्होत्रायाः स्वागतं कर्तुं धर्मशालायां दलेन प्रस्तावितानां कार्यक्रमानां च योजना कृता। अस्य कार्यक्रमस्य संयोजकः त्रिलोककपूरः सहसंयोजकः राकेशशर्मा च वर्तते।

## कांगड़ामण्डी-जनपदयोः चतुर्णां ग्रामसभानां प्रस्तावना निरस्ता



हिमसंस्कृतवार्ताः- शिमला। राज्यसर्वकारेण द्वयोः मण्डलयोः चतुर्णां ग्रामसभानां प्रस्तावः निरस्तीकर्तुं तत्र उल्लिखितानां ग्रामसभाक्षेत्राणां पुनर्सङ्घटनार्थं च अधिसूचना कृता। पंचायतीराजविभागस्य सचिवेन अस्मिन् विषये आदेशाः कृताः सन्ति। अधिसूचनानुसारं 9 मई 2025 इत्यस्य अन्तर्गतं जिलामण्डी इत्यत्र ग्रामसभायाः क्षेत्राणां पुनर्सङ्घटनस्य प्रस्तावस्य माध्यमेन सम्बन्धितग्रामसभायाः सदस्यैः आपत्तयः तथा परामर्शाः आमंत्रिताः। जिलामंडी, हिमाचलस्य ग्रामसभाक्षेत्राणां पुनर्सङ्घटनार्थस्य सम्बन्धे उपरोक्तानुसारं प्रकाशितायाम् अधिसूचनायां उल्लिखिता ग्रामसभा बाता-री-बिंदू इत्यस्य प्रस्तावः निरस्तीकृतः। एतदतिरिक्तं जिलाबिलासपुरस्य ग्रामसभाक्षेत्राणां पुनर्सङ्घटनप्रस्तावद्वारा सम्बन्धित- ग्रामसभासदस्यानाम् आक्षेपाः परामर्शाः च आमन्त्रिताः। अस्मिन् विषये कोऽपि परामर्शः न प्राप्तः। हिमाचलप्रदेशस्य जिला बिलासपुरस्य हम्बोटा तथा सलोआ ग्रामसभा क्षेत्रयोः पुनर्सङ्घटनार्थं आदेशाः कृताः सन्ति। अस्य अतिरिक्तं काङ्गड़ामण्डलस्य ग्रामसभाक्षेत्राणां पुनर्सङ्घटनप्रस्तावद्वारा सम्बन्धित-ग्रामसभासदस्यानाम् आक्षेपाः परामर्शाः च आमन्त्रिताः। काङ्गड़ामण्डलस्य ग्रामसभाक्षेत्राणां पुनर्गठनसम्बद्धे ग्रामसभातटवाली, मैरा, चलौर इत्येतेषां प्रस्तावः निरस्तं कृत्वा ग्रामसभाक्षेत्राणां पुनर्गठनार्थं आदेशाः दत्ताः सन्ति। एतदतिरिक्तं हमीरपुरजनपदस्य भोरंजविकासखण्डस्य ग्रामसभा मनवी इत्यस्या नामपरिवर्तनं कृत्वा लगमनवीं इति कृतमस्ति।



# ‘पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च’ विषयक- एकविंशतिदिनात्मक- राष्ट्रिय कार्यशालायाः द्वितीयदिवसस्य विधिवत् समापनं जातम्




**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः नलबारी, असम।** असमप्रदेशस्य नलबारी जनपदे २४ जून २०२५ तमे दिनांके कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये केन्द्रीय- संस्कृत- विश्वविद्यालयस्य सहकार्ये आयोज्यमाना “पाण्डुलिपिविज्ञानं प्रतिलेखनञ्च” विषयक- एकविंशति- दिनात्मकराष्ट्रिय कार्यशाला अद्य द्वितीयं दिवसं समारभ्य उत्तमरूपेण सम्पन्ना। संस्कृतवाङ्मयस्य भारतीयसंस्कृतिसंरक्षणस्य च दृष्टीकोणतः अतीव महत्त्वपूर्णा एषा कार्यशाला अतिथिवक्तॄणां गहनचिन्तनम्, प्रतिभागिनां सक्रियभागग्रहणं च लक्षीकृत्य ज्ञानवर्धनस्य साधनसम्प्राप्तेः च एकं मञ्चरूपेण विकसितं भवति। द्वितीयदिनस्य प्रारम्भः विश्वविद्यालयस्य शोधच्छात्रस्य लिराजकाफ्लेमहोदयस्य भावपूर्णेन वैदिकमङ्गलाचरणेन अभवत्। मन्त्रैः शान्तिप्रदायकैः पर्यावरणं पूर्णं पवित्रमिव जातम्। ततः कार्यक्रमस्य संचालनकार्यं विश्वविद्यालयस्य परीक्षानियन्त्रकः सर्वदर्शनविभागाध्यक्षः च डॉ. रणजीतकुमारतिवारीमहोदयेन आत्मीयतया समारब्धम्। कार्यक्रमे प्रमुखसाहाय्यं साहित्यविभागस्य सहायकाचार्यः डॉ. छबिलाल उपाध्यायमहोदयः, धर्मशास्त्रविभागाध्यक्षा डॉ. मैत्रेयी गोस्वामीमहोदया च कृतवती। द्वितीयदिनस्य आकर्षणम् आसीत् डॉ बसन्तकुमारदेवगोस्वामिमहोदयस्य विस्तीर्णज्ञानोपदेशः। सः नलबारीमहाविद्यालयस्य प्राचार्यचरः, पाण्डुलिपिशास्त्रविशारदश्च अस्ति। अद्य चत्वारि सत्राणि जातानि यत्र महोदयेन तात्त्विकम्, व्यावहारिकं च शिक्षणं समर्पितम्।

**प्रथमसत्रम्-** प्रथमसत्रे डॉ. बसन्तमहोदयेन सांख्यदर्शनस्य सङ्क्षिप्तपरिचयं दत्वा तत्र आप्तवचनस्य स्वरूपं विवेचितम्। तेन ‘एतिह्य’ इति शब्दस्य व्युत्पत्तिमूलकं विवेचनं कृत्वा पाण्डुलिपिसम्बद्धं तस्य प्रयोगः व्याख्यातः। तेनोक्तं यत् यदा वयं पाण्डुलिपीनां पुष्पिकां निरीक्षामहे, तदा तस्य लेखनकालम्, लेखकम्, तदस्य शैलीं च ज्ञातुं शक्यते। अस्मिन्सत्रे असमप्रदेशस्य प्राचीनमन्दिराणां विवेचनं विशेषरूपेण आहृतम्। महोदयेन तत्र स्थितचित्रलिपीनां विषयमपि आलोकितम्। तेनोक्तं यत् एषाः चित्रलिपयः न केवलं लिपीवर्याः, अपि तु ‘भावलिपयः’– याः प्रत्यक्षरूपेण भावप्रकाशनाय सहायकाः भवन्ति।

**द्वितीयसत्रम्-** द्वितीयसत्रे पाण्डुलिपीनाम् आन्तरिकसंरचनायाः शास्त्रीयविश्लेषणं कृतम्। तेन दर्शितं यत् एकस्याः पाण्डुलिपेः केवलं पाठबन्धः एव न, अपि तु पुष्पिका, लेखशैली, ग्रन्थनामसंकेताः, सम्पुटबन्धनरूपेणापि बहुधा विवरणानि दत्तानि स्युः। एतेषां माध्यमेन पाण्डुलिपीनां कालक्रमे वर्गीकरणं साध्यते।

**तृतीयसत्रम्-** तृतीयसत्रे प्रयोगात्मिका गतिविधिः आयोजिताभवत्। अत्र पाण्डुलिपि- लेखनसामग्रीणां विषये छात्रेभ्यः ज्ञानं प्रदत्तम्। तेन विविधप्रकारेण लेखनविधेः प्रदर्शनं कृत्वा छात्रेभ्यः तस्य अभ्यासः कारितः।

**चतुर्थसत्रम्-** दिनस्य अन्त्यसत्रे विश्वविद्यालये स्थितग्रन्थगारे उपलब्धाः विविधप्राचीनपाण्डुलिप्यः प्रतिभागिभ्यः दर्शिताः। डॉ. बसन्तमहोदयेन तत्रैव पठनाभ्यासः च कारितः। विभिन्नशैव- वैष्णव- वैदिक- आयुर्वेद शाखासम्बद्धाः दुर्लभग्रन्थाः छात्रेभ्यः दर्शनाय उपस्थापिताः। सत्रे पाण्डुलिपीनां महत्वं, संरक्षणपद्धतयः, प्रतिलेखनस्य शास्त्र च विषयगतचर्चायाः माध्यमेन विवेचितम्।एषः दिवसः केवलं वक्तृत्वप्रधानः न, अपि तु संवादप्रधानः अपि आसीत्। अन्त्यसत्रे पाण्डुलिपिविषये एकं मुक्तचिन्तनमेलनं आयोज्य प्रतिभागिनां जिज्ञासानां समाधानं कृतम्। एषा संवादप्रक्रिया सम्पूर्णकार्यशालायाः हृदयं जातम्। दिवसस्य समापनं डॉ. रणजीतकुमारतिवारीमहोदयेन वैदिकशान्तिमन्त्रेण कृतम्। सर्वे सहभागिजनाः उत्साहिताः, प्रेरिताः च जाताः। तेषां नूतनज्ञानं, नूतनानुभवः च कार्यशालायाः प्रभावं व्यञ्जयति।

# "लौकिकन्यायकोशः"

## "आम्रसेक-पितृतर्पणन्यायः“




आम्रवृक्षस्य मूले पितृतर्पणं क्रियते चेत् तत् जलम् आम्रवृक्षः प्राप्नोति। अर्थात् जलाञ्जलेः फलद्वयम् अस्ति- पितृतर्पणं भवति आम्रवृक्षस्य कृते जलमपि लभ्यते। एकया एव क्रियया फलद्वयं लभ्यत इति अनेन न्यायेन सूच्यते। "आम्राश्च सिक्ताः पितरश्च तृप्ताः। एका क्रिया द्वयर्थकरी प्रसिद्धा।।

**द्रष्टव्यम्-** आम्राश्च सिक्ताः पितरश्च प्रीणिता महाभाष्ये १-१-१।।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# मस्तिष्करोगः


चित्र - मानव मस्तिष्क का सममितार्धी ( सेजीटल) काट

मस्तिष्करोगः कश्चन मस्तिष्कसम्बन्धित रोगः । शिरोभागे कापले निहतः मस्तिष्कः। मानवस्य अतीव मुख्यम् अङ्गं भवति । अयं मस्तिष्कः त्रिधा विभक्ता । मस्तिष्कस्य पुरोभागः, मस्तिष्कस्य पृष्ठभागः, मस्तिष्कस्य मध्यभागः च इति । मस्तिष्कस्य पुरोभागः अधिकभागः आक्रान्तः अस्ति । जन्तूनां दैनन्दिनक्रियादयः मस्तिष्केन एव नियन्त्रिताः सन्ति । प्रकृत्याः अद्भुतसृष्टिः ।

## मस्तिष्करोगस्य कारणानि

हृद्रोगेषु घनीभूतरक्तं मस्तिष्करक्तनालान् प्रविश्य रक्तनालेषु सरलतया रक्तसञ्चारः न भवति । रक्तसञ्चारः निधानगत्या भवति । अनेन कारणेन रक्तनालाः स्फायन्ते । कालन्तारे स्फोटिताः भवन्ति ।

वयः यदा सञ्जायते तदा रक्तनालाः कठिणाः भवन्ति । तदा रक्तनालेषु रक्तप्रसरणक्रिया मन्दा भवति । अनेन कारेण मस्तिष्करोगाः उत्पद्यन्ते । मस्तिष्के शोफाः भवन्ति । कर्कटरोगस्य अपि शोफाः भवन्ति । कालन्तरे अनेनैव कारणेन शिरोवेदना, वमनम्, बुद्धभ्रमणम् च भवति । वयाधिक्येन मस्तिष्कस्य शक्तिः क्षीणा भवति । अनेन मन्दमतिः भवति मनुष्यः ।

गर्भिणी यदा भवति तदा क्षरश्मयः भ्रूणस्य उपरि पतन्ति चेत् मस्तिष्कस्य वर्धनं मन्दं भवति । अनेन कारणेन मस्तिष्करोगाः उत्पत्स्यन्ते । स्त्री पञ्चत्रिंवशदधिका वयस्का चेत् गर्भधारणयोग्या न ।

## रोगनिवारणोपायाः

- ❑ उद्वेगः न करणीयः ।
- ❑ मस्तिष्कस्य विश्रान्तिनिमित्तं मनोरञ्जनादिषु भागः ओढव्यः ।
- ❑ शुद्धा अहारव्यस्था भवेत् ।
- ❑ वैद्यस्य मार्गदर्शनं प्राप्तव्यम् ।

# संस्कृतप्रार्थना




प्रातः काले जपित्वा तव नाम प्रभो!
प्रातः काले जपित्वा तव नाम प्रभो!
प्रारभामहे वयमद्यतनीयं कर्म प्रभो!

1.
गुरुसेवा हि प्रथमो धर्मस्यात् सदा
महत्तया चाकाशं प्रति याम सदा
भवानेवादिरन्तोऽपि भवान् प्रभो!
प्रारभामहे वयमद्यतनीयं..............

2.
शुद्धचेतसा भवतो ध्यानं कुर्मो वयम्
वरं विद्यायाः भवतः प्राप्नुयाम वयम्
भवता हि नः प्रातः भवता सन्ध्या विभो!
प्रारभामहे वयमद्यतनीयं..............

अनुवादकः-
पं० जय भगवान् शास्त्री
'कैथल'हरियाणा
संस्कृताध्यापकः
राजकीय वरिष्ठ माध्यमिक विद्यालयः
कठवाड़ः (कैथलनगरम्)
दूरवाणीसंख्या-9991829095
इयं प्रार्थना 'JM SHASTRI BIRLA' यूट्यूब चैनलोपरि उपलब्धाऽस्ति।

## मनोविज्ञाने ध्यानस्वरूपम्

मनोविज्ञाने ध्यानस्वरूपम् अतीव महत्त्वपूर्णः विषयः वर्तते, येन मनसः समस्यानां समाधानं भवितुम् अर्हति।

### पतञ्जलिमतम्

ननु किमिदं ध्यानं नाम? भगवता पतञ्जलिमहर्षिणा ध्यानमष्टाङ्गयोगव्याख्यानावसर एवम्प्रकारेण व्याख्यातम् - ' तत्र प्रत्ययस्यैकतानता ध्यानम्” इति । तत्र तस्मिन् देशे विषयदेशे प्रत्ययस्यैकतानता सदृशः प्रवाहः प्रत्ययान्तरेणापरामृष्टो ध्यानमित्युच्यते। यदा चित्तं समाहितं भूत्वा कमपि विषयं समनस्कं ध्यायति पश्यति, तदा वयं ब्रूमः 'ध्यानेन स पश्यति' इति । समनस्कमिति ध्यानयुक्तम् । ध्यानस्य पूर्ववर्तिकारणद्वयं भवति, तद्यथा - एकस्मिन्नेव विषयदेशे बाह्ये आभ्यन्तरे वा चित्तबन्धत्वमिति प्रथमं कारणम्। तदेव महर्षिपतञ्जलिना धारणापदेनाभिहितम् । अपरञ्च ध्यानजनकं कारणमितर- विषयेभ्यः। चित्तवृत्तीनां प्रत्यावर्तनमिति । इदन्तु 'प्रत्याहार' इति पदेनाभिधीयते। यदा तु चित्तमेकेन विषयेणैव सम्प्रयुज्यतेऽपरैश्च विषयैर्विनिवर्तते, तदा यं विषयं चित्तमेकीभूय घनीभूय केन्द्रितं भूत्वा वा चिन्तयति, स ध्यानविषय इति कथ्यते । कथं हि चैतन्यं मनो वा केन्द्रितं घनीभूतं वैकस्मिन् विषये जायते कीदृशं वा ध्यानस्य स्वरूपमिति निर्वक्तुं न शक्यते। यत्किञ्चिद् वयं निर्वर्णयितुं शक्नुमस्तत्तु किं हि खलु ध्यानेन जायते, केन केन कारणजातेन चेतनस्य प्रत्ययैकतानत्वमापद्यत इति । अस्माभिर्ध्यान- मिति शब्दोऽतिविस्तृतमनोविज्ञानक्षेत्रोपयोगित्वेनात्र व्यवहृतः, न तु केवलमष्टाङ्गयोगपरत्वेन प्रसंख्यानपरत्वेन, यथा योगदर्शनाचार्यैरयं प्रयुज्यते। एवम्भूतोऽयं ध्यानशब्दश्चैतन्यस्य सामान्यं व्यापारमभिव्यञ्जयति । नहि ध्यानव्यतिरिक्तं किमपि ज्ञानं संवेदनं प्रयत्नो वा प्राकट्यं लभते। न ह्यस्माकमयमाग्रहः - 'ध्यानं क्षणमात्रस्थायि भवत्युत घटिकाद्वयपर्यवसायि' इति। यदस्माभिरभिप्रेतं तत्त्विदमेव यदेकस्मिन् विषये केन्द्रीभूते चैतन्यस्य तारतम्येन प्रवाहो विद्यत इति। एकस्मिन् विषयेऽनुभवैकतानत्वमेव ध्यानमित्यभिधीयते। ध्यानमवधान- मित्यनर्थान्तरम्।